द्वितीयः पाठः
२

# बुद्धिर्यस्य बलं तस्य?

( क्तवतु , लङ्लकारः च )

(हितोपदेशे बालानां बोधाय पशुपक्षीणां संवादमाध्यमेन रोचकाः कथाः वर्णिताः सन्ति। तासु एषा अपि मनोहरकथा, अत्र वयं काकस्य चातुर्यविषये जानीमः।)



एकस्मिन् वने कश्चन महावृक्षः आसीत्। तत्र एकः काकः पत्न्या सह वसति स्म। तस्य एव वृक्षस्य कोटरे एकः कृष्णः सर्पः अपि वसति स्म। यदा काकस्य पत्नी प्रसूता भवति तदा कृष्णसर्पः तस्याः अण्डानि खादति स्म। एतेन दुःखेन काकः तस्य च पत्नी महद् दुःखम् अनुभवतः स्म।



अतः एकदा काकः स्वमित्रस्य शृगालस्य समीपं गत्वा उक्तवान् भो मित्र ! सः कृष्णसर्पः कथं मारणीयः। उपायं सूचयतु इति । शृगालः एकम् उपायं सूचितवान् । तत् श्रुत्वा काकः बहु सन्तुष्टः। तदनन्तरं काकः उड्डीय नगरम् आगतवान्। तत्र महाराजस्य सरोवरे अन्तःपुरस्त्रियः जलक्रीडायां मग्नाः आसन्। तासां वस्त्राणि आभरणानि च सरोवरस्य सोपानेषु स्थापितानि आसन्। काकः तत्र गतवान् एकं सुवर्णहारं ग्रहीत्वा अरण्याभिमुखं प्रस्थितवान्। तद् दृष्ट्वा राजभटाः काकम् अनुसृतवन्तः।



काकः अरण्यम् आगत्य महावृक्षस्य कोटरे तं हारं पातितवान्। स्वयं दूरं गतवान् च। राजभटाः तत्र आगतवन्तः। कोटरे हारं दृष्टवन्तः । तदा तत्र स्थितः कृष्णसर्पः कोपेन बहिः आगतवान्। राजभटाः दण्डप्रहारेण तं मारितवन्तः। हारं च नीतवन्तः। तदनन्तरं काकः स्वपत्न्या सह सुखेन जीवितवान्।

**''उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः''**

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| महावृक्षः | विशालवृक्षः | बड़ा वृक्ष |
| तत्र | तस्मिन् स्थाने | वहाँ |
| कोटरे | वृक्षस्य विवरे | वृक्ष की खोखर में |
| सर्पः | भुजङ्गः | सांप |
| एकदा | एकस्मिन् समये | एक समय |
| समीपम् | निकटे | पास में |
| श्रृगालस्य | जम्बूकस्य | सियार के |
| कथञ्चित् | केनाऽपि प्रकारेण | कैसे भी |
| सरोवरस्य | तडागस्य | तालाब के |
| सोपानेषु | श्रेणीषु | सीढियों पर |
| सुवर्णहारम् | स्वर्णस्य हारम् | सोने के हार को |
| अरण्याभिमुखम् | वनं प्रति | जंगल की ओर |
| कोपेन | क्रोधेन | क्रोध में आकर |
| बहिः | बाह्यभागे | बाहर |
| राजभटाः | राजपुरुषाः | राजा के सैनिक |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

| | | | | |
|---|---|---|---|---|
| कश्चन | श्रृगालः | सन्तुष्टः | अन्तःपुरस्त्रियः | सुवर्णहारः |
| अरण्याभिमुखम् | प्रस्थितवान् | दृष्टवन्तः | यच्छक्यम् | पराक्रमैः । |

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) वृक्षस्य कोटरे कः वसति स्म ?

(ख) श्रृगालः कस्य मित्रम् आसीत् ?

(ग) काकः सुवर्णहारं ग्रहीत्वा कुत्र प्रस्थितवान् ?

(घ) के दण्डप्रहारेण कृष्णसर्पं मारितवन्तः ?

**३. निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) काक: सुवर्णहारं ग्रहीत्वा कुत्र पातितवान् ?

(ख) काक: शृगालस्य समीपं गत्वा किम् उक्तवान् ?

(ग) अन्त:पुरस्त्रिय: कुत्र मग्ना: आसन् ?

(घ) काकस्य शावकान् क: खादति स्म ?

**४. मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयत -**

| शृगाल:, | कृष्णसर्प:, | अन्त:पुरस्त्रिय:, | पत्न्या, | कोटरे |
|---|---|---|---|---|

(क) महावृक्षे एक: काक: ........................ सह वसति स्म।

(ख) सरोवरे ............................ जलक्रीडायां मग्ना: आसन् ।

(ग) .................................................... कोपेन बहि: आगतवान्।

(घ) काक: अरण्यम् आगत्य महावृक्षस्य ............................ तं हारं पातितवान् ।

(ङ) ............................एकम् उपायं सूचितवान्।

**५. उपयुक्तशब्देन वाक्यं पूरयत -**

(क) राजभटा: दण्डप्रहारेण ..................मारितवन्त:। (काकं/शृगालं/कृष्णसर्पं)

(ख) ............................काकम् उपायं सूचितवान्। (राजपुरुष:/ शृगाल:/ कृष्णसर्प:)

(ग) काक: महावृक्षस्य कोटरे ................पातितवान्। (हारं/ फलं /वस्त्रम् )

(घ) ........................... तस्य शावकान् खादति स्म। (काक:/शृगाल:/कृष्णसर्प:)

**६. रेखाङ्कितानिपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

(क) <u>शृगाल:</u> एकम् उपायं सूचितवान्।

(ख) एक: काक: <u>महावृक्षे</u> पत्न्या सह वसति स्म।

(ग) काक: <u>शृगालस्य</u> मित्रम् आसीत्।

(घ) कृष्णसर्प: <u>काकस्य</u> शावकान् खादति स्म।

७. निम्नलिखितपदानां विभक्तिं वचनं च लिखत –

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा– | शृगालस्य | षष्ठी | एकवचनम् |
| (क) | हारम् | ................ | .................... |
| (ख) | शावकान् | ................ | .................... |
| (ग) | सरोवरस्य | ................ | .................... |
| (घ) | राजभटाः | ................ | .................... |
| (ङ) | वृक्षस्य | ................ | .................... |

८. प्रदत्तक्रियापदानां भूतकालिकानि क्तवतु प्रत्ययान्तानि रूपाणि लिखत –

| | पदम् | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| यथा– | पठति | पठितवान् | पठितवती | पठितवत् |
| (क) | लिखति | .................. | .................... | ..................... |
| (ख) | खादति | .................. | .................... | ..................... |
| (ग) | क्रीडति | .................... | .................... | ..................... |
| (घ) | पिबति | ..................... | ................... | ..................... |
| (ङ) | चलति | .................... | .................... | ..................... |
| (च) | गणयति | ..................... | .................... | ..................... |
| (छ) | पालयति | ..................... | .................... | ..................... |

९. वर्तमानकालस्य वाक्यानि क्तवतुप्रत्यय प्रयोगेण भूतकाले परिवर्तयत –

| | | |
|---|---|---|
| (क) | छात्रः पठति। | छात्रः पठितवान्। |
| (ख) | अतिथिः आगच्छति। | ............................. |
| (ग) | पिता धनं ददाति। | ............................. |
| (घ) | महिला नियमं पालयति। | ............................. |
| (ङ) | मित्रं धावति। | ............................. |
| (च) | जलं पतति । | ............................. |

१०. **निम्नाङ्कितवाक्येषु वचनपरिवर्तनं कृत्वा रिक्तस्थानानि पूरयत –**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **यथा –** | अश्वः धावितवान् | अश्वौ धावितवन्तौ । | अश्वाः धावितवन्तः । |
| | पत्रकारः गतवान् । | .......................... । | ........................... । |
| | वानरः कूर्दितवान् । | .......................... । | ........................... । |
| **यथा –** | बालिका पठितवती । | बालिके पठितवत्ये । | बालिकाः पठितवत्यः । |
| | लेखिका लिखितवती । | .......................... । | ........................... । |
| | अध्यापिका पाठितवती । | .......................... । | ........................... । |
| **यथा –** | मित्रम् आगतवत् । | मित्रे आगतवती । | मित्राणि आगतवन्ति । |
| | फलं पतितवत् । | .......................... । | ........................... । |
| | यानम् आगतवत् । | .......................... । | ........................... । |

## योग्यता-विस्तारः

१. हितोपदेशस्य रचयिता नारायणपण्डितः अस्ति। हितोपदेशे भारतीयजनमानसस्य परिवेषेण प्रभाविताः उपदेशात्मककथाः सन्ति। हितोपदेशकथाः अतीवसरलाः सरसाः सुग्राह्याश्च भवन्ति। सर्वा अपि कथाः परस्परम् अन्योन्याश्रिताः सन्ति। हितोपदेशे कथाः चतुर्षु भागेषु विभक्ताः विद्यन्ते –

1. मित्रलाभः 2. सुहृद्भेदः 3. विग्रहः 4. सन्धिः

२. **धातुप्रत्ययसंयोगेन निर्मितानि कानिचन विशेषरूपाणि जानीत –**

| | धातुः | | प्रत्ययः | | पदम् |
|---|---|---|---|---|---|
| **यथा–** | वच् | + | क्तवतु | = | उक्तवान् |
| | पच् | + | क्तवतु | = | पक्ववान् |
| | प्र + स्था | + | क्तवतु | = | प्रस्थितवान् |
| | गम् | + | क्तवतु | = | गतवान् |
| | दृश् | + | क्तवतु | = | दृष्टवान् |
| | नी | + | क्तवतु | = | नीतवान् |
| | कृ | + | क्तवतु | = | कृतवान् |
| | पा | + | क्तवतु | = | पीतवान् |



बालकः पतति



बालकः पतितवान्

### ३. मञ्जूषातः उचितशब्दं चित्वा अधोलिखितकथां पूरयत –





| |
|---|
| पिपीलिकाम् , मर्दयितुम् , शुण्डायाम् , प्रयतितवान् , गजः , त्वाम् , मारयितुम् |

एकदा एकः .................... गच्छति स्म। स मार्गे एकां ........................... दृष्टवान्। गजः अवदत् रे पिपीलिके ! इतः अपसर नो चेत् अहं ........................... मर्दयिष्यामि। पिपीलिका कथयति "भो गज ! भवान् तु महान् अस्ति" मां कथं ......................... शक्नोति। बलवान् न एवं करोति। गर्वेण गर्वितः गजः पुनरवदत् अपसर इति। गते काले एकदा पिपिलिका गजस्य ......................... प्राविशत्। पीडितः गजः अवदत् कोऽयं मां .............. इच्छति। पिपीलिका वदति अहं सः एव तुच्छजीवः यं भवान् मारयितुं ................................ । किन्तु अहं त्वां न मारयामि। अहं न तुच्छचिन्तनशीला।

**अध्यापकाय निर्देशः –**

- शिक्षकः छात्रान् गणे विभज्य मण्डले वा उपावेशयत्। छात्राः एकैकं वाक्यं रचयित्वा कथां पूरयेयुः।
- शिक्षकः छात्राणां माध्यमेन अनन्तरकथारचनां नवीनकथारचनां वा कारयेत्। अत्र प्रत्येकं छात्रोऽपि सहभागी भवेत्।